रघूत्तम गुरु स्तोत्रम

गंभीराशयगुंफसंभृतवचःसंदर्भगर्भोल्लस–
ट्टीकाभावविबोधनाय जगतां यस्यावतारोऽजनि ।
तत्पादृक्षदुरंतसंततपःसंतानसतोषित–
श्रीकांतं सुगुणं रघोत्तमगुरुं वंदे परं देशिकम ॥ १ ॥

सच्छास्त्रामलभावबोधकिरणैः संवर्धयन मध्वस–
त्सिद्धांताब्धिमनंतशिष्यकुमुदव्रातं विकासं नयन ।
उद्भूतो रघुवर्यतीर्थजलधेस्तापत्रयं त्रासयन
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रयम ॥ २ ॥

उद्यन्मार्तंडसंकाशं दंडमालाकमंडलून ।
धरं कौपीनसूत्रं च सीताराघवमानसम ॥ ३ ॥

श्रीनिवासेन वंद्यांघ्रिं तुलसीदामभूषणम ।
ध्यायेद्रघूत्तमगुरुं सर्वसौख्यप्रदं नृणाम ॥ ४ ॥

रघूत्तमगुरुं नौमि शांत्यादिगुणमंडितम ।
रघूत्तमपदद्वंद्वकंजभृंगायितांतरम ॥ ५ ॥

रघूत्तमगुरुं वंदे रघूत्तमपदार्चकम ।
गांभीर्येणार्थबाहुल्यटीकातात्पर्यबोधकम ॥ ६ ॥

भावबोधकृतं नौमि भावभावितभावुकम ।
भावभाजं भावजादिपरीभावपरायणम ॥ ७ ॥

सन्न्यायविवृतेष्टीकाशेषसंपूर्तिकारिणम ।
टीकां दृष्ट्वापेटिकानां निचयं च चकार यः ।
प्रमेयमणिमालानां स्थापनाय महामतिः ॥ ८ ॥

यच्छिष्यशिष्यशिष्याद्याष्टिप्पण्याचार्यसंज्ञिताः ।
तमलं भावबोधार्यं भूयो भूयो नमाम्यहम ॥ ९ ॥

शुकेन शांत्यादिषु वाङ्मयेषु व्यासेन
धैर्येऽ०बुधिनोपमेयम ।
मनोजजित्यां मनसां हि पत्या
रघूत्तमाख्यं स्वगुरुं नमामि ॥ १० ॥

राम राम तव पादपंकजं चिंतयामि भवबंधमुक्तये ।
वंदितं सुरनरेंद्रमौलिभिर्ध्यायते मनसि योगिभिः सदा ॥ ११ ॥

पिनाकिनीरसंजुष्टदेशे वासमनोरमम ।
पिनाकिपूज्यश्रीमध्वशास्त्रवर्धिनिशाकरान ॥ १२ ॥

पंचकैर्भावभोधाख्यैर्ग्रंथैः पंचलसन्मुखैः ।
तत्त्वविज्ञापकैः स्वानामुपमेयं पिनाकिना ॥ १३ ॥

गांभीर्ये सर्वदुर्वादिगिरिपक्षविदारणे ।
विषयेषु विरागित्वे चोपमेयं पिनाकिना ॥ १४ ॥

धरणे भगवन्मूर्तेर्भरणे भक्तसंततेः ।
विना विना चोपमेयं मेयं तत्त्वप्रकाशने ॥ १५ ॥

गुरुत्वेऽखिललोकानां प्रदानेऽभीष्टसंततेः ।
शिष्येभ्यस्तत्त्वविज्ञानप्रदाने परमं गुरुम ॥ १६ ॥

सदाररामपादाब्जसदारतिसुधाकरम ।
सदाऽरिभेदने विष्णुगदारिसदृशं सदा ॥ १७ ॥

रघुनाथांघ्रिसद्भक्तौ रघुनाथानुजायितम ।
रघुनाथार्यपाण्युत्थरघुवर्यकरोदितम ॥ १८ ॥

वेदेशार्चितपादाब्जं वेदेशांघ्र्यब्जपूजकम ।
रघूत्तमगुरुं वंदे रघूत्तमपदार्चकम ॥ १९ ॥

रघूत्तमगुरुस्तोत्रस्याष्टकं यः पठेन्नरः ।
रघूत्तमप्रसादाच्च स सर्वाभीष्टभाग्भवेत ॥ २० ॥

यद–वृंदावनपूर्वतः फलवती धात्री जगत्पावनी
याम्यायां तु पिनाकिनी चलदलो मूर्तित्रयाधिष्ठितः ।
वारुण्यां दिशि वामतः प्रतिकृतौ छाया कृता तिंत्रिणी
तद–वृंदावनमध्यगो गुरुवरो भूयात स नः श्रेयसे ॥ २१ ॥

प्रणत्कामधेनुं च भजत्सुरतरूपमम ।
श्रीभावबोधकृत्पादचिंतामणिमुपास्महे ॥ २२ ॥

रघूत्तममुनींद्रा ये सर्वे शास्त्रविशारदाः ।
विद्यागुरून कुलगुरून नौमि तान मे जगद्गुरून ॥ २३ ॥

सेवे रघूत्तममहागुरुम ।
यच्छिष्यशिष्यशिष्याद्याष्टिप्पण्याचार्यसंज्ञिताः ॥

॥ इति श्रीरघूत्तमगुरुस्तोत्रं संपूर्णम ॥

www.yousigma.com